प्रथमः पाठः

# अविवेकः परमापदां पदम्



**ततस्तेन नकुलेन बालसमीपमुपसर्पन् कृष्णसर्पो दृष्टः।**

**ऋचा** व्योम! एकं प्रश्नं पृच्छामि। कः सः पशुः यः सर्पस्य शत्रुः?

**व्योमः** ऋचे! गरुडः सर्पं भक्षयति। मयूरः अपि अहिभुक् कथ्यते।

**ऋचा** व्योम! एतौ तु खगौ, न तु पशू।

**व्योमः** आम्, ज्ञातम्। एषः नकुलः सर्पस्य शत्रुः यस्य चित्रम् अत्र दत्तम्।

**ऋचा** इदानीं वद, किम् अस्यां कथायां सर्पः बालं दशति अथवा नकुलः सर्पं मारयति?

**व्योमः** एतत् तु कथां पठित्वा एव ज्ञास्यामः परन्तु प्रथमम् एतत् वद – कुतः गृहीता एषा कथा?

**ऋचा** मम आचार्या अकथयत्–एषा कथा हितोपदेशात् गृहीता। तत्र अनेकाः मनोरञ्जकाः नीतिकथाः सन्ति।

**व्योमः** बाढम्। पाठं पठित्वा तव प्रश्नस्य उत्तरं दास्यामि।

**ऋचा** शोभनम्! अधुना पाठं पठामः।

प्रथमः पाठः

# अविवेकः परमापदां पदम्

अस्ति उज्जयिन्यां माधवः नाम विप्रः। एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता। अथ ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः। ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत्–यदि सत्वरं न गच्छामि तर्हि अन्यः कश्चित् श्राद्धार्थं वृतः भवेत्। यतः–

**आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।**
**क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥**

किन्तु बालस्य अत्र रक्षकः नास्ति। तत् किं करोमि? भवतु, चिरकालपालितम् इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः। स तं व्यापाद्य खण्डशः कृतवान्। अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः। ब्राह्मणं दृष्ट्वा नकुलः रक्त-विलिप्त-मुख-पादः तस्य चरणयोः अलुठत्। विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत्। अत उच्यते–

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अक्रियमाणस्य** (वि॰) [कृ+कर्मवा॰+शानच्, ष॰वि॰ए॰व॰] | (क्षिप्रम्) न क्रियमाणस्य | (तुरन्त) न किये जाते हुए कार्य का | of the task which is not being accomplished immediately. |
| **अपत्यस्य** (सं॰) [नपुं॰, ष॰ए॰व॰] | सन्ततेः | सन्तान का | of the child. |
| **अलुठत्** (क्रि॰) [लुठ्, लङ् प्र॰पु॰ए॰व॰] | (भूमौ) लुठति स्म | लोटने लगा | rolled on the ground. |
| **अवधार्य** (अव्य.) [अव+ धृ+णिच्+ल्यप्] | अवगत्य/मत्वा | निश्चय करके | having thought. |

| | | | |
|---|---|---|---|
| **अवस्थाप्य** (अव्य०) [अव+स्था+णिच्+ल्यप्] | स्थापयित्वा/नियोज्य | नियुक्त करके | having placed. |
| **आदानस्य** (वि.) [ष०ए०व०नपुं०] | 'प्रदानस्य' विलोमः, स्वीकरणस्य | लेने का | (of) receiving, accepting. |
| **आपदाम्** (सं०) [स्त्री० आपद् ष०ब०व०] | सङ्कटानाम्, विपदाम् | विपत्तियों का | of the calamities. |
| **उपसर्पन्** (वि०)[उप+सृप्+शतृ, पुं० प्र०ए०व०] | समीपम् गच्छन् | पास जाते हुए | going near. |
| **उपसृत्य** (अव्य०)[उप+सृ+ ल्यप्] | समीपं गत्वा | पास जाकर | having approached. |
| **उपावृत्तः** (क्रि०) (उप+आ+वृत्) (प्र० पु०ए०व०) | प्रत्यागतः | लौट आया | returned. |
| **कृष्णसर्पः** (सं.) [कृष्णः चासौ सर्पः कर्मधा०] | कृष्णः भुजङ्गः | काला साँप | black snake. |
| **क्षिप्रम्** (अव्य०) | शीघ्रम्, आशु, सत्वरम् | शीघ्र, जल्दी | quickly, soon. |
| **गुणलुब्धाः** (वि०) [गुणैः लुब्धाः तृ० त० पु०] | गुणैः आकृष्टाः | गुणों द्वारा आकृष्ट | attracted by virtues. |
| **पदम्** (सं०) [नपुं०, प्र०ए०व०] | स्थानम् | स्थान | place. |
| **पुत्रनिर्विशेषम्** (क्रि० वि०) | पुत्रतुल्यम् | पुत्र के समान | like a son. |
| **मुषितम्** (वि०) (द्वि०ए०व०)[मुष्+क्त] | वञ्चितम् | ठगा हुआ, लुटा हुआ | robbed, deceived. |
| **रक्तविलिप्तमुखपादः** (वि०) ( पुं०प्र०ए०व०) [रक्तेन विलिप्तं मुखं पादाः च यस्य सः (ब०व्री०)] | रुधिरलिप्तमुखचरणः | रक्त से सने हुए मुख और पैर वाला | one with feet and mouth smeared with blood. |
| **रसम्** (सं०) ( पुं०द्वि०ए०व०) (सन्दर्भे) | आनन्दम्, महत्त्वम् | आनन्द, महत्त्व, सार | substance, significance. |

| | | | |
|---|---|---|---|
| **विमृश्यकारिणम्** (वि०) (पुं०द्वि०ए०व०) | विचार्य कार्यकर्तारम् | विचारपूर्वक कार्य करने वाले को | to a person who acts thoughtfully. |
| **विषादम्** (सं०) ( पुं०द्वि०ए०व०) | शोकम्; खिन्नता | दु:ख | dejection, unhappiness, distress. |
| **वीक्ष्य** (अव्य०)(वि+ईक्ष्+ल्यप्] | दृष्ट्वा | देखकर | after having seen. |
| **वृणते** (क्रि०) [वृ० लट्, प्र०पु०ब०व०] | वरणं कुर्वन्ति | वरण करती हैं | prefer, choose. |
| **वृत:** (वि०) (पुं०प्र०ए०व०) [वृ+क्त] | आमन्त्रित: | निमन्त्रित | invited. |
| **व्यापादितवान्** (क्रि०) [वि+आ+पद्+णिच्+क्तवतु] | हतवान् | वध किया , मार दिया | killed. |
| **सत्वरम्** (अव्य०) | शीघ्रम् | जल्दी | quickly. |
| **सुस्थ:** (वि०) [पुं० प्र०ए०व०] | सम्यक् स्थित: | सही दशा में विद्यमान, सही रूप में | alright. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| स्वबालापत्यस्य | = | स्वबाल+अपत्यस्य | कश्चित् | = | क:+चित् |
| तद्रसम् | = | तत्+रसम् | ततस्तेन | = | तत:+तेन |
| ब्राह्मणोऽपि | = | ब्राह्मण:+अपि | बालकोऽनेन | = | बालक:+अनेन |
| सर्पश्च | = | सर्प:+च | अत उच्यते | = | अत:+उच्यते |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| अस्ति+उज्जयिन्याम् | = | अस्त्युज्जयिन्याम् | बालस्य+अत्र | = | बालस्यात्र |
| कृष्णसर्प:+दृष्ट: | = | कृष्णसर्पो दृष्ट: | विप्र:+तथाविधम् | = | विप्रस्तथाविधम् |
| तत:+तम् | = | ततस्तम् | निरीक्ष्य+आत्मानम् | = | निरीक्ष्यात्मानम् |

**संयोगः**

क्षिप्रमक्रियमाणस्य = क्षिप्रम्+अक्रियमाणस्य

क्रियामविवेकः = क्रियाम्+अविवेकः

# अभ्यासः

**1. निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) उज्जयिन्यां किं नाम विप्रः अवसत्? ........................................

(ख) माधवः केन श्राद्धार्थं निमन्त्रितः? ........................................

(ग) अक्रियमाणस्य कर्तव्यस्य रसं कः पिबति? ........................................

(घ) 'किं करोमि' इति कः चिन्तयति? ........................................

(ङ) कृष्णसर्पः केन दृष्टः? ........................................

(च) नकुलं कः व्यापादितवान्? ........................................

(छ) सम्पदः कं वृणते? ........................................

**2. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -**

(क) ब्राह्मणः बालकस्य रक्षायै कम् उपायम् अचिन्तयत्?

........................................................................................................................

(ख) ब्राह्मणेन अविचार्य किं कृतम्?

........................................................................................................................

(ग) कालः कस्य रसं पिबति?

........................................................................................................................

(घ) कीदृशः नकुलः ब्राह्मणस्य चरणयोः अलुठत्?

........................................................................................................................

(ङ) नकुलेन कः व्यापादितः?

........................................................................................................................

(च) परमापदां पदं किम्?

........................................................................................................................

(ङ) सम्पदः कीदृश्यः भवन्ति?

........................................................................................................................

**3. अधोलिखितवाक्येषु स्थूलपदानि आश्रित्य प्रश्ननिर्माणं कुरुत –**

(क) माधवः **उज्जयिन्याम्** अवसत्। ..............................

(ख) ब्राह्मणी शिशोः रक्षार्थं **ब्राह्मणं** नियोज्य स्नातुं गता। ..............................

(ग) ब्राह्मणः **दारिद्र्यात्** अचिन्तयत्। ..............................

(घ) यदि कार्यं क्षिप्रं न क्रियते तदा कालः **तस्य** रसं पिबति। ..............................

(ङ) स ब्राह्मणः **नकुलं** बालरक्षायाम् व्यवस्थापयत्। ..............................

(च) नकुलः समीपम् आगच्छन्तं **कृष्णसर्पम्** अमारयत्। ..............................

(छ) नकुलस्य मुखं पादाः च **रक्तेन** विलिप्ताः। ..............................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'अस्ति उज्जयिन्यां माधवः नाम विप्रः।' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्? ..............................

(ख) 'किन्तु बालस्य अत्र रक्षकः नास्ति।' अत्र किं कर्तृपदं वर्तते? ..............................

(ग) 'ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तस्य चरणयोः अलुठत्।' अस्मिन् वाक्ये किं विशेष्यपदं प्रयुक्तम्? ..............................

(घ) 'अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः।' अत्र 'दत्त्वा' इति पदस्य किं विलोमपदं प्रदत्तम् अस्ति? ..............................

(ङ) 'बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति।' अत्र 'बालकः सुस्थः' इत्यनयोः पदयोः किं विशेषणपदम् अस्ति? ..............................

(च) 'यदि सत्वरं न गच्छामि' इत्यत्र 'शीघ्रम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्? ..............................

**5. घटनाक्रमानुसारं वाक्यानि पुस्तिकायां लिखत –**

(क) ब्राह्मणः नकुलं बालरक्षार्थं व्यवस्थाप्य गच्छति।

(ख) उज्जयिन्यां माधवो नाम विप्रः वसति।

(ग) ब्राह्मणः श्राद्धं गृहीत्वा प्रत्यागच्छति।

(घ) ब्राह्मणः श्राद्धार्थं राज्ञा निमन्त्रितः भवति।

(ङ) ब्राह्मणः श्राद्धार्थं राज्ञः प्रासादं गच्छति।

(च) नकुलः बालकस्य समीपम् आगच्छन्तं सर्पं मारयति।

(छ) ब्राह्मणः सुस्थं पुत्रं दृष्ट्वा विषादमनुभवति।

(ज) नकुलस्य मुखं रक्तविलिप्तं भवति।

(झ) ब्राह्मणः रक्तविलिप्तमुखं नकुलं दृष्ट्वा चिन्तयति– 'नूनं खादितः मे पुत्रः अनेन नकुलेन।'

(ञ) सहसा क्रियां न विदधीत।

6. **अधोलिखितकथनयोः उचितभावार्थं ( ✔ ) इति चिह्नेन प्रदर्शयत –**

(अ) **सहसा विदधीत न क्रियाम्–**

(i) कार्यं सर्वदा एव विचार्य कर्तव्यम्।

(ii) कार्यं यदा कदा एव विचार्य कर्तव्यम्।

(iii) कानिचित् कार्याणि एव विचार्य कर्तव्यानि न तु सर्वाणि।

(ब) **क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्–**

(i) कालः कार्यस्य आनन्दं नाशयति।

(ii) कार्यस्य आनन्दः स्वयम् एव नश्यति।

(iii) कार्यस्य स्वादः न्यूनः भवति।

7. **समुचितप्रतीपमेलनं कुरुत –**

| | | |
|---|---|---|
| (क) आदानम् | .................................... | दूरम् |
| (ख) समीपम् | .................................... | अपसृत्य |
| (ग) दारिद्र्यम् | .................................... | अविवेकः |
| (घ) विवेकः | .................................... | प्रदानम् |
| (ङ) उपसृत्य | .................................... | सम्पन्नता |

8. **अत्र विशेषणानि दत्तानि। एतानि अधोलिखितविशेष्यैः सह योजयत –**

**विशेषणानि** – चिरकालपालितः, पुत्रनिर्विशेषः, कृष्णः, रक्तविलिप्तमुखपादः, सुस्थः, व्यापादितः, उपकारकः, मृतः

**विशेष्याणि** –

| नकुलः | बालकः | सर्पः |
|---|---|---|
| .................................... | .................................... | .................................... |
| .................................... | .................................... | .................................... |
| .................................... | .................................... | .................................... |



## अन्वयः

1. **अन्वयः** – आदानस्य, प्रदानस्य, क्षिप्रम् अक्रियमाणस्य च कर्तव्यस्य कर्मणः तद्रसम् कालः पिबति।

2. **अन्वयः** – क्रियाम् सहसा न विदधीत, अविवेकः परम् आपदाम् पदम् (अस्ति)। गुणलुब्धाः सम्पदः स्वयम् एव विमृश्यकारिणम् (नरम्) हि वृणते।

# योग्यताविस्तारः

## (क) भावविस्तारः

**गुणलुब्धाः सम्पदः** – सम्पदः तं पुरुषमेव वृण्वन्ति यः विचार्य कार्यं करोति। अतएव उच्यते–

**यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्।**
**न हि कस्तूरिकामोदः शपथेन विभाव्यते॥**

अपि च –

**गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः।**
**प्रसादशिखरस्थोऽपि काकः किं गरुडायते॥**
**न हि जन्मनि ज्येष्ठत्वं, ज्येष्ठत्वं गुण उच्यते।**
**गुणाद् गुरुत्वमायाति दधि दुग्धं घृतं यथा॥**

## (ख) भाषाविस्तारः

**(1) तत्पुरुषबहुव्रीहिसमासयोः भेदः**

यदा अन्तिमपदं प्रधानं वर्तते, पूर्वपदं च तस्मिन् आश्रितं, तदा तत्पुरुषसमासः भवति, यदा च अन्यपदप्रधानं वर्तते तदा बहुव्रीहिः समासः भवति यथा–

रक्तविलिप्तम् = रक्तेन विलिप्तम्, तृ० तत्पुरुषः

रक्तविलिप्तं मुखं पादौ च यस्य सः = रक्तविलिप्तमुखपादः, बहुव्रीहिः

**(2) उपपदतत्पुरुषः–**

विमृश्य करोति इति विमृश्यकारिन्। सम्यक् तिष्ठति इति सुस्थः।

पयः ददाति इति पयोदः। पयांसि धीयन्ते अस्मिन् इति पयोधिः।

जले जायते इति जलजम् एवं पङ्कजम्, सरसिजम्, अम्बुजम् आदयः।

**(3) यदा धातोः पूर्वमुपसर्गः भवति तदा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' भवति। अत्र केवलं 'य' अवशिष्यते।**

अधि+इ+ल्यप् = अधीत्य। वि+अव+स्था (णिच्)+ल्यप् = व्यवस्थाप्य।

अव+धृ+ल्यप् = अवधृत्य। अव+धृ+ (णिच्)+ल्यप् = अवधार्य।

**(4) (i) 'क्त' प्रत्ययेन युक्तानि पदानि विशेषणानि भवन्ति।**

**यथा–वृतः ब्राह्मणः।**

(1) पालितं नकुलम् (2) मृतं सर्पम् (3) सुप्तां कन्याम् (4) व्यापादितः सर्पः (5) कृतं कार्यम्

**(ii) क्रियापदानि अपि भवन्ति। यथा –**

(1) तेन पुस्तकं पठितम् (2) तेन फलानि भक्षितानि (3) मया दूरदर्शनं दृष्टम्

5. उदाहरणानुसारं शब्दनिर्माणं कुरुत –

**(क) सम्यक् तिष्ठति = सुस्थः**

(1) समीपे तिष्ठति = समीपस्थः

(2) दूरे तिष्ठति = ................................

(3) निकटे तिष्ठति = ................................

**(ख) वृक्षे तिष्ठति = वृक्षस्थः**

(1) गृहे तिष्ठति = ................................

(2) विमाने तिष्ठति = ................................

(3) समाधौ तिष्ठति = ................................

6. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत –

**सः पाठकः यः पठति**

(क) सः पालकः यः ................................

(ख) सः नर्तकः यः ................................

(ग) सः गायकः यः ................................

(घ) सः याचकः यः ................................

(ङ) सः धावकः यः ................................

## कोऽहं वदतु साम्प्रतम्

यानस्याङ्गं हरेः शस्त्रं चिह्नं भारतभूपतेः।

चलन्तं वर्तुलाकारं यो जानाति स पण्डितः॥

**भावार्थः –** वाहनस्य एकम् अङ्गं, विष्णोः शस्त्रं, भारतीयसर्वकारस्य चिह्नं, वर्तुलाकारं च चलन्तं, यः अवगच्छति सः विवेकशीलः विद्वान् अस्ति।

## एहि हसाम

**पतिः** – (पत्नीं प्रति उच्चस्वरेण) – मम स्नानाय उष्णं जलं शीघ्रम् आनय, अन्यथा....!!!

**पत्नीः** – (क्रोधपूर्वकम्) अन्यथा, भवान् किं करिष्यति?

**पतिः** – (ससम्भ्रमम्) – किं करिष्यामि? शीतलेन जलेन एव स्नानं करिष्याम्यहम्।